# आदर्श-प्रश्नपत्रम् - 2024-25

## कक्षा - दशमी

## संस्कृतम् (सम्प्रेषणात्मकम्) (कोड-सङ्ख्या - 119)

**समयः - 3 होराः** **पूर्णाङ्काः - 80**

**सामान्यनिर्देशाः –**

1. कृपया सम्यक्तया परीक्षणं कुर्वन्तु यत् अस्मिन् प्रश्नपत्रे 11 पृष्ठानि मुद्रितानि सन्ति।
2. कृपया सम्यक्तया परीक्षणं कुर्वन्तु यत् अस्मिन् प्रश्नपत्रे 18 प्रश्नाः सन्ति।
3. अस्मिन् प्रश्नपत्रे चत्वारः भागाः सन्ति।
4. प्रत्येकं भागम् अधिकृत्य उत्तराणि एकस्मिन् स्थाने क्रमेण लेखनीयानि।
5. उत्तरलेखनात् पूर्वं प्रश्नस्य क्रमाङ्कः अवश्यं लेखनीयः।
6. प्रश्नस्य क्रमाङ्कः प्रश्नपत्रानुसारम् एव लेखनीयः।
7. सर्वेषां प्रश्नानाम् उत्तराणि संस्कृतेन लेखनीयानि।
8. प्रश्नानां निर्देशाः ध्यानेन अवश्यं पठनीयाः।

**प्रश्नपत्रस्वरूपम् -**

| | | | |
|---|---|---|---|
| 'क' भागः | : | अपठितावबोधनम् | 10 अङ्काः |
| 'ख' भागः | : | रचनात्मककार्यम् | 15 अङ्काः |
| 'ग' भागः | : | अनुप्रयुक्तव्याकरणम् | 25 अङ्काः |
| 'घ' भागः | : | पठितावबोधनम् | 30 अङ्काः |

## 'क' भागः

### अपठितावबोधनम् (10 अङ्काः)

| | | |
|---|---|---|
| 1. | **अधोलिखितं गद्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत –**<br>प्रकृतिः अस्माकं सर्वेषां जननी अस्ति। एषा स्वप्राकृतिकसंसाधनैः व्यवस्थाभिः च अस्मान् पोषयति पालयति रक्षति च। यदा एतानि संसाधनानि नष्टानि प्रदूषितानि वा भवन्ति प्राकृतिक-व्यवस्था च भङ्गा भवति तदा जीवनाय सङ्कटः उत्पद्यते। अद्यत्वे अस्माकं पर्यावरणस्य प्रदूषणं निरन्तरं वर्धमानम् अस्ति। अद्य पर्यावरण-प्रदूषणं संसारस्य भीषणतमा समस्या अस्ति। प्राचीनकाले यद्यपि पर्यावरणस्य प्रदूषणस्य समस्या नासीत् तथापि वेदेषु स्थाने-स्थाने ऋषीणां पर्यावरण-विषयकं चिन्तनं दृश्यते। स्वच्छं पर्यावरणम् अस्माकं जीवनस्य आधारः अस्ति। पर्यावरणस्य आधाराः | 10 |

पुष्पिताः, पल्लविताः वृक्षाः भवन्ति। वृक्षाः पर्यावरणं सन्तुलितं शुद्धं च कुर्वन्ति। वृक्षाः भूमेः जलं गृह्णन्ति। वृक्षाणाम् इदं जलं मेघानां निर्माणे सहायकं भवति। इत्थं वृक्षाः वर्षायै सहायकाः भवन्ति। वृक्षाः पुष्पाणां, फलानाम् औषधीनां च स्रोताः सन्ति। ते अस्मभ्यं सर्वम् अर्पयन्ति। वृक्षाः रोपणीयाः इति उद्घोषयन्तः अपि वयं प्रतिदिनं तेषां कर्तनं पश्यामः इत्यस्ति चिन्तनीयः विषयः। अस्माभिः न विस्मरणीयं यत् **वृक्षाः सत्पुरुषा इव**।

अ. एकपदेन उत्तरत – (केवलं प्रश्नद्वयम्) 1×2=2

(i) अद्य संसारस्य भीषणतमा समस्या का अस्ति?

(ii) वृक्षाः कुतः जलं गृह्णन्ति?

(iii) के अस्मभ्यं सर्वम् अर्पयन्ति?

आ. पूर्णवाक्येन उत्तरत - (केवलं प्रश्नद्वयम्) 2×2=4

(i) पर्यावरणस्य आधाराः के भवन्ति?

(ii) वृक्षाः केषाम् स्रोताः सन्ति?

(iii) वृक्षाः कथं वर्षायै सहायकाः भवन्ति?

इ. अस्य अनुच्छेदस्य कृते उपयुक्तं शीर्षकं संस्कृतेन लिखत। 1

ई. यथानिर्देशम् उत्तरत - (केवलं प्रश्नत्रयम्) 1×3=3

(i) 'प्राचीनकाले यद्यपि पर्यावरणप्रदूषणस्य समस्या नासीत्' अत्र 'आसीत्' क्रियापदस्य कर्तृपदं किम्?

(क) प्राचीनकाले (ख) यद्यपि

(ग) समस्या (घ) पर्यावरणप्रदूषणस्य

(ii) 'वयं प्रतिदिनं तेषां कर्तनं पश्यामः' अत्र क्रियापदं किम् अस्ति?

(क) कर्तनम् (ख) तेषाम्

(ग) प्रतिदिनं (घ) पश्यामः

(iii) 'पर्यावरणम्' इति पदस्य किं विशेषणपदम्?

(क) वृक्षम् (ख) स्वच्छम्

(ग) जलम् (घ) प्रदूषणम्

(iv) 'तरवः' इति पदस्य पर्यायपदं चिनुत।

(क) वृक्षाः (ख) आगाराः

(ग) सहायकाः (घ) पुष्पिताः

## 'ख' भागः

## रचनात्मकं कार्यम् (15 अङ्काः)

2. भवतः नाम तनिष्कः। भवतः विद्यालये संस्कृतनाटकस्य मञ्चनम् अभवत्। तदर्थं मित्रं दीपकम् प्रति लिखितं पत्रं मञ्जूषातः पदानां सहायतया पूरयित्वा उत्तरपुस्तिकायां लिखत - ½×10=5

आदर्शविद्यालयः,

(i) ----------------

| | | |
|---|---|---|
| | दिनाङ्कः ---------------<br><br>प्रियमित्र (ii) ----------------<br>(iii) ----------------।<br>अत्र सर्वगतं कुशलम्। आशासे त्वम् अपि कुशली। यथा त्वं जानासि गत सप्ताहे मम विद्यालये संस्कृत-उत्सवः सम्पन्नः। अस्मिन् उत्सवे संस्कृतपरिषदः (iv) ----------- पाठ्यपुस्तकस्य 'कवयामि वयामि यामि' इति नाटकस्य (v) --------- अकुर्वन्। तस्मिन् नाटके मया 'भोजस्य' अभिनयः कृतः। कुविन्दस्य अभिनयं मम मित्रं प्राञ्जलः अकरोत्। तस्य मुखात् श्लोकगायनं (vi) ---------- सर्वेऽपि उपस्थिताः दर्शकाः भावविभोराः जाताः करतलध्वनिभिः च तस्य उत्साहवर्धनम् (vii) ----------। कार्यक्रमस्य अन्तेऽपि मुख्यातिथिमहोदयेन संस्कृतनाटकस्य भूरि भूरि (viii) --------- कृता। वस्तुतः अयम् उत्सवः मनोरञ्जकं ज्ञानवर्धकं च आसीत्।<br>तव विद्यालये संस्कृतोत्सवः कदा भविष्यति इति अवश्यं सूचय। मातृपितृचरणेषु (ix) -------------- प्रणामाः।<br>तव मित्रम्<br>(x) ---------------<br><br>**मञ्जूषा**<br>प्रशंसा, कृतवन्तः, श्रुत्वा, दिल्लीतः, मम, तनिष्कः, दीपक!, छात्राः, सस्नेहं नमः, मञ्चनम्। | |
| 3. | **प्रदत्तं चित्रं दृष्ट्वा मञ्जूषायां प्रदत्तशब्दानां सहायतया पञ्च वाक्यानि संस्कृतेन लिखत –**<br><br>**मञ्जूषा**<br>तरन्ति, स्वच्छम्, ग्रीष्मकाले, तरणतालस्य, जनाः, बालाः,<br>कुर्वन्ति, प्रसन्नाः, जलक्रीडाम्, जलम्, कन्दुकम्, सन्ति। | 1×5=5 |

| | | |
|---|---|---|
| | **अथवा**<br>**मञ्जूषाप्रदत्तशब्दानां साहाय्येन निम्नलिखितं विषयम् अधिकृत्य पञ्चभिः संस्कृतवाक्यैः एकम् अनुच्छेदं लिखत –**<br>**"अनुशासनस्य महत्त्वम्"**<br>**मञ्जूषा**<br>साफल्यम्, जनयति, परिश्रमेण सह, आलस्यम्, प्राप्नोति, स्वस्थम्, दिनचर्या, आत्मविश्वासः,जीवनम्, स्वलक्ष्यम्, आवश्यकम्, आत्मानम्, दुर्गुणेभ्यः। | 1×5=5 |
| | | |
| 4. | **मञ्जूषाप्रदत्तपदैः रिक्तस्थानानि पूरयित्वा अधोलिखितसंवादं पुनः लिखत-**<br>**पुत्रः** - तात! प्रणमामि।<br>**पिता** – (i) ------------------------------------<br>**पुत्रः** - आम् तात! सर्वं कुशलम् अस्ति।<br>**पिता** - उत्तमम्। विद्यालये तव अध्ययनं कथं प्रचलति, कापि समस्या तु नास्ति?<br>**पुत्रः** - न, कापि समस्या नास्ति परन्तु एकत्र भवताम् अनुमतिं सहाय्यं च इच्छामि।<br>**पिता** - कस्मिन् सन्दर्भे, निस्सङ्कोचं वद।<br>**पुत्रः** – श्वः मम प्रियशिक्षकस्य जन्मोत्सवः भविष्यति। (ii) अहम् ------------------------।<br>**पिता** - शिक्षक तु सदैव पूज्यः। तस्मिन् सन्दर्भे सङ्कोचः न कर्तव्यः। (iii) ------------------<br>**पुत्रः** - अहं पूर्वमेव पृष्टवान्, कार्यक्रमः सायं सप्तवादने भविष्यति। केवलं भवतां समयस्य आशङ्का आसीत्।<br>**पिता** - चतुर! सर्वं निश्चित्य मां पृच्छसि। (iv) ----------।<br>**पुत्रः** - तात! किमपि उपायनं स्वीकरणीयम् अस्ति।<br>**पिता** - अस्तु! मात्रा सह आपणं गत्वा उत्तमम् उपायनं स्वीकुरु।<br>**पुत्रः** - (v) ------------------------।<br>**मञ्जूषा**<br>(i) अस्तु,अहं कार्यालयात् समयेन आगमिष्यामि।<br>(ii) अस्तु, धन्यवादः।<br>(iii) शिक्षकं पृच्छ, कदा कार्यक्रमः भविष्यति?<br>(iv) तत्र भवता सह गन्तुम् इच्छामि।<br>(v) चिरञ्जीव! वद सर्वं कुशलम्?<br>**अथवा**<br>**मञ्जूषायाः सहायतया अधोलिखितां कथां पूरयित्वा पुनः लिखत-**<br>एकदा एका चटका आसीत्। सा वनस्य एकस्मिन् उन्नतवृक्षे (i) ----------- वसति स्म। एकदा वने (ii) ------- वृष्टिः अभवत्। तदा पीडितः एकः वानरः (iii) ---------- तत्वृक्षस्य अधः आगच्छत्। | 1×5=5<br><br>½×10=5 |

| | | |
|---|---|---|
| | वानरं दृष्ट्वा (iv) -------- अवदत् - "भोः वानर! भवान् किमर्थं व्यर्थमेव दुःखी भवति? (v) ------शरीरं मनुष्य-शरीरम् (vi) ------------- अस्ति। हस्तौ पादौ च सम्यक् सन्ति। भवान् उत्तम-गृहस्य (vii) ---------- किमर्थं न करोति?" तत् श्रुत्वा वानरः कुपितः अभवत्। वानरः (viii) ----------चटकाम् अवदत्- "किमर्थं भवती तूष्णीं न (ix) ---------------? किमर्थं मम उपहासं करोति?" इति उक्त्वा सः वानरः (x) --------------- आरोहत् चटकायाः च नीडम् अनाशयत्। अतः कथ्यते- मूर्खेभ्यः सदुपदेशाः न हिताय।<br>**मञ्जूषा**<br>निर्माणम्, चटका, भवतः, स्वनीडे, महती, आश्रयार्थम्, इव, तिष्ठति, वृक्षम्, कोपेन। | |
| | | |
| | **'ग' भागः**<br>**अनुप्रयुक्तव्याकरणम् (25 अङ्काः)** | |
| 5. | **अधोलिखितवाक्येषु रेखाङ्कितपदेषु सन्धिं सन्धिच्छेदं वा कुरुत- (केवलं प्रश्नचतुष्टयम्)**<br>(i) केन **प्रयुक्तः + अयं** पापं चरति पुरुषः।<br>(ii) **नैतत्** मनुष्येषु प्रयोक्तव्यम्।<br>(iii) आसीत् प्रच्छन्नभाग्यः **कश्चित्** कुमारः।<br>(iv) **पापिनाञ्च** सदा दुःखम्।<br>(v) अत्र **संस्कृत +छात्राः** पठन्ति। | 1×4=4 |
| | | |
| 6. | **अधोलिखितवाक्येषु रेखाङ्कितपदानां समस्तपदं विग्रहं वा प्रदत्तविकल्पेभ्यः चित्वा लिखत – (केवलं प्रश्नचतुष्टयम्)**<br>(i) **सर्वदा** शारदा अस्माकं वदनाम्बुजे सन्निधिं कुर्यात्।<br>(क) सर्वेभ्यः ददाति इति (ख) सर्वं ददाति इति<br>(ग) सर्वैः दीयते (घ) सर्वं आददाति इति<br>(ii) **युधिष्ठिरार्जुनौ** रथारोहणं नाटयतः।<br>(क) युधिष्ठिरः अर्जुनः द्वौ (ख) युधिष्ठिरः अर्जुनौ च<br>(ग) युधिष्ठिरः च अर्जुनः च (घ) युधिष्ठिरौ अर्जुनौ च<br>(iii) अरुणाचले अनेकानि **पर्यटनाय स्थलानि** सन्ति।<br>(क) पर्यटनस्थलाः (ख) पर्यटनस्थलम्<br>(ग) पर्यटनास्थलानि (घ) पर्यटनस्थलानि<br>(iv) सः अपि तत् नेत्रं **स्थानम् अनतिक्रम्य** अस्थापयत्।<br>(क) यथास्थानम् (ख) अनुस्थानम्<br>(ग) प्रतिस्थानम् (घ) उपस्थानम् | 1×4=4 |

| | | |
|---|---|---|
| | (v) को भेदः **<u>पिकस्य च काकस्य च</u>**?<br>(क) पिककाकस्य (ख) पिककाकानाम्<br>(ग) पिककाकयोः (घ) पिककाकौ | |
| | | |
| 7. | **अधोलिखितवाक्येषु रेखाङ्कितपदानां प्रकृति-प्रत्ययौ संयोज्य विभज्य वा उचितम् उत्तरं विकल्पेभ्यः चित्वा लिखत - (केवलं प्रश्नचतुष्टयम्)**<br>(i) देहल्याम् अनेकानि **<u>ऐतिहासिकानि</u>** स्थलानि सन्ति।<br>(क) इतिहास+मतुप् (ख) इतिहास+ठक्<br>(ग) इतिहास+ङीप् (घ) इतिहास+टाप्<br>(ii) अधुना **<u>रमणीय+टाप्</u>** हि सृष्टिः एषा।<br>(क) रमणी (ख) रमणीयता<br>(ग) रमणीयः (घ) रमणीया<br>(iii) केचन **<u>पञ्चत्वं</u>** गताः।<br>(क) पञ्च+त्व (ख) पञ्च+त्वम्<br>(ग) पञ्च+तल् (घ) पञ्च+टाप्<br>(iv) विद्वांसः एव लोकेऽस्मिन् **<u>चक्षुस् + मतुप्</u>** प्रकीर्तिताः।<br>(क) चक्षुस्मन्तः (ख) चक्षुष्मान्<br>(ग) चक्षुष्मन्तः (घ) चक्षुस्मतुप्<br>(v) व्यवहारे सदा **<u>सरल+तल्</u>** भवेत्।<br>(क) सरलता (ख) सरलत्वम्<br>(ग) सरला (घ) सरलतायाः | 1×4=4 |
| | | |
| 8. | **वाच्यानुसारम् उचितपदैः रिक्तस्थानानि पूरयित्वा अधोलिखितं संवादं पुनः लिखत – (केवलं प्रश्नत्रयम्)**<br>**वेदांशी**– कपिल! (i) ------------- कस्यां कक्षायां पठ्यते?<br>**कपिलः** – अहम् अष्टमी-कक्षायां पठामि।<br>**वेदांशी** – तव विद्यालये छात्रैः सर्वप्रथमं किं (ii) ----------?<br>**कपिलः** – सर्वप्रथमं छात्राः (iii) -------------- कुर्वन्ति। अधुना त्वया किं क्रियते?<br>**वेदांशी** – अधुना (iv) ------------ विडियो-क्रीडां क्रीडामि।<br>**कपिलः** - एतत् उचितं न अस्ति। अधुना परीक्षाकालः अस्ति अतः त्वया पठनीयम्।<br>**मञ्जूषा**<br>प्रार्थनाम्, त्वया, अहम्, क्रियते। | 1×3=3 |
| | | |

| | | |
|---|---|---|
| 9. | कालबोधकशब्दैः अधोलिखित-दिनचर्यां पूरयत- (केवलं प्रश्नत्रयम्)<br>(i) कृषकः जगदीशः प्रातः --------- (7:30) वादने क्षेत्रं गच्छति।<br>(ii) तत्र ------------- (12:15) वादनपर्यन्तं सः शस्यं सिञ्चति।<br>(iii) मध्याह्ने ------------- (1:00) वादने सः विश्रामं करोति।<br>(iv) ----------- (2:45) वादने सः पुनः कृषिकार्येषु संलग्नः भवति। | 1×3=3 |
| | | |
| 10. | मञ्जूषायां प्रदत्तैः उचितैः अव्ययपदैः अधोलिखितवाक्येषु रिक्तस्थानानि पूरयत - (केवलं प्रश्नचतुष्टयम्)<br>(i) कदापि ............. कार्यं न करणीयम्।।<br>(ii) -------- विषादं त्यक्त्वा उद्यमः क्रियताम्।<br>(iii) एषः कलहः ----------- भवतां विनाशकारणं भविष्यति।<br>(iv) अवक्रता यथा चित्ते .......... वाचि भवेत्।<br>(v) अर्थिनः .......... धनलाभमात्रेण सन्तोषं भजन्ते।<br><br>मञ्जूषा - [ तु, नूनम्, तथा, सहसा, इदानीम् ] | 1×4=4 |
| | | |
| 11. | अधोलिखितवाक्येषु रेखाङ्कित-अशुद्धपदाय उचितपदं चित्वा वाक्यानि पुनः लिखत – (केवलं प्रश्नत्रयम्)<br>(i) कपयः प्रहस्य **<u>अवदत्</u>**।<br>(क) अवदत (ख) अवदताम्<br>(ग) अवदन् (घ) अवदः<br>(ii) **<u>कीदृशः</u>** तव मैत्री?<br>(क) कीदृशं (ख) कीदृशी<br>(ग) कीदृशीः (घ) कीदृशाः<br>(iii) **<u>त्वं</u>** द्रौणेः चपलां प्रकृतिं न जानाति।<br>(क) भवन्तः (ख) वयम्<br>(ग) भवान् (घ) युवाम्<br>(iv) श्वः त्वं किं **<u>करोषि</u>**?<br>(क) करिष्यसि (ख) अकरोत्<br>(ग) अकरोः (घ) करिष्यति | 1×3=3 |
| | | |
| | **'घ' भागः**<br>**पठितावबोधनम्** (30 अङ्काः) | |
| 12. | अधोलिखितं गद्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत – | 5 |

| | | |
|---|---|---|
| | कदाचित् दानशालासु विचरन् स राजा बहुधनलाभेन सन्तुष्टानाम् अर्थिनां विरलसंख्यां विलोक्य अचिन्तयत्- मम अर्थिनः तु धनलाभमात्रेण सन्तोषं भजन्ते। राज्ञि एवं विचारयति सति तस्य दानशीलतां परीक्षितुं देवाधिपतिः शक्रः नेत्रहीनयाचकस्य रूपं धारयित्वा तत्पुरतः अवदत्-हे राजन्! भवतः दानवीरताम् आकर्ण्य आशान्वितः भवत्समीपम् आगतोऽस्मि। देव! रवि-शशि-तारा-मण्डलभूषितं जगत् एतत् कथमिव पश्येयं चक्षुर्हीनः!<br>राजा उवाच– भगवन्! भवन्मनोरथं पूरयित्वा आत्मानम् अनुगृहीतं कर्तुम् इच्छामि। आदिश्यताम्, किं करवाणि? विप्रः उवाच - यदि भवान् प्रीतः, तदा त्वत्तः एकस्य चक्षुषः दानम् इच्छामि येन मम लोकयात्रा निर्बाधा भवेत्। तत् श्रुत्वा राजा अचिन्तयत्, "लोके चक्षुर्दानं दुष्करमेव"। | |
| | **अ. एकपदेन उत्तरत – (केवलं प्रश्नद्वयम्)** | ½×2=1 |
| | (i) अर्थिनः केन सन्तुष्टाः आसन्?<br>(ii) लोके किम् दुष्करम् अस्ति?<br>(iii) चक्षुषा विप्रस्य का निर्बाधा भवेत्? | |
| | **आ. पूर्णवाक्येन उत्तरत - (केवलं प्रश्नद्वयम्)** | 1×2=2 |
| | (i) शक्रः नेत्रहीनयाचकस्य रूपं धारयित्वा राज्ञः पुरतः किमवदत्?<br>(ii) शक्रः किं परीक्षितुम् आगतः?<br>(iii) विप्रः किमर्थं चक्षुषः दानम् इच्छति स्म? | |
| | **इ. निर्देशानुसारम् उत्तरत- (केवलं प्रश्नद्वयम्)** | 1×2=2 |
| | (i) 'श्रुत्वा' इति पदस्य किं पर्यायपदं गद्यांशे प्रयुक्तम्?<br>(ii) 'अर्थिनः' इत्यस्य क्रियापदं किं प्रयुक्तम्?<br>(iii) 'ईदृशं दानम्' अत्र विशेष्यपदं किम्? | |
| | | |
| 13. | **अधोलिखितपद्ये पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत –** | 5 |
| | **असंशयं महाबाहो मनो दुर्निग्रहं चलम्।<br>अभ्यासेन तु कौन्तेय वैराग्येण च गृह्यते ॥<br>कलहान्तानि हर्म्याणि कुवाक्यान्तं च सौहृदम्।<br>कुराजान्तानि राष्ट्राणि कुकर्मान्तं यशो नृणाम् ॥** | |
| | **अ. एकपदेन उत्तरत - (केवलं प्रश्नद्वयम्)** | ½×2=1 |
| | (i) मनुष्याणां यशः कीदृशः भवति?<br>(ii) कुवाक्यान्तं किं भवति?<br>(iii) कलहेन कानि नश्यन्ति? | |
| | **आ. पूर्णवाक्येन उत्तरत - (केवलं प्रश्नद्वयम्)** | 1×2=2 |
| | (i) मनः कीदृशं भवति?<br>(ii) मनः कथं गृह्यते?<br>(iii) कुराजान्तानि कानि भवन्ति? | |

| | | |
|---|---|---|
| | इ. निर्देशानुसारम् उत्तरत- (केवलं प्रश्नद्वयम्)<br>(i) 'मित्रता' इत्यस्य किं पर्यायपदं प्रयुक्तम्?<br>(ii) 'चलम्' इत्यस्य विशेष्यपदं चित्वा लिखत।<br>(iii) अत्र पद्ययोः क्रियापदं किम् अस्ति? | 1×2=2 |
| | | |
| 14. | अधोलिखितं नाट्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत –<br>(ततः पुत्रशोकसन्तप्ताः युधिष्ठिरः भीमः द्रौपदी च रणभूमौ प्रविशन्ति।)<br>**द्रौपदी -** (दीर्घं निःश्वस्य) हा हन्त। किम् इदं घोरम् आपतितम्। पापकर्मणा द्रौणिना मे पुत्राः भ्रातरः च हताः। अग्निः इव दहति माम् अयं शोकः।<br>**युधिष्ठिरः -** शुभे! धैर्यं धारय। नूनं तव पुत्राः वीरगतिम् एव प्राप्ताः। वीरजननी त्वं शोचितुं न अर्हसि।<br>**द्रौपदी -** कथं मन्दभाग्या अहं धैर्यं धारयामि। यावत् असौ क्रूरकर्मा न दण्ड्यते, तावत् अहम् इतः न गमिष्यामि, अत्रैव प्राणत्यागं च करिष्यामि।<br>**युधिष्ठिरः -** प्रिये! मा एवं ब्रूयाः। स पापकर्मा कुत्र गतः इति न जानीमः। अतिदूरं किञ्चिद् दुर्गमवनं प्रविष्टः भवेत्।<br>**द्रौपदी -** (भीमं प्रति) आर्यपुत्र! क्षत्रधर्मम् अनुस्मरन् मां शोकसागरात् रक्ष। अस्मिन् संसारे कश्चित् अपि त्वया सदृशः पराक्रमी नास्ति। पुरा वारणावते त्वमेव पाण्डवान् रक्षितवान्। विराट-नगरे अपि त्वं मां प्राणसङ्कटात् उद्धृतवान्।<br>**भीमः -** (युधिष्ठिरं प्रति) भ्रातः! द्रौणिम् अनुगन्तुं मह्यम् अनुमतिं ददातु भवान्।<br>**युधिष्ठिरः -** गच्छ वत्स! विजयी भव, नकुलः तव सारथिः भवतु।<br>(भीमसेनः निर्गच्छति, श्रीकृष्णः अर्जुनेन सह प्रविशति।) | 5 |
| | अ. एकपदेन उत्तरत - (केवलं प्रश्नद्वयम्)<br>(i) का आत्मानं मन्दभाग्या इति कथयति?<br>(ii) पुरा कुत्र भीमः पाण्डवान् रक्षितवान्?<br>(iii) युधिष्ठिरः भीमः द्रौपदी कुत्र प्रविशन्ति? | ½×2=1 |
| | आ. पूर्णवाक्येन उत्तरत - (केवलं प्रश्नद्वयम्)<br>(i) द्रौपदी दीर्घं निःश्वस्य किं कथयति?<br>(ii) भीमः कदा पाण्डवान् रक्षितवान्?<br>(iii) भीमः किमर्थम् अनुमतिम् इच्छति? | 1×2=2 |
| | इ. निर्देशानुसारम् उत्तरत- (केवलं प्रश्नद्वयम्)<br>(i) 'निर्गच्छति' इत्यस्य किं विपर्यय-पदम् अत्र प्रयुक्तम्?<br>(ii) 'श्रीकृष्णः अर्जुनेन सह प्रविशति।' अत्र कर्तृपदं किम् प्रयुक्तम्? | 1×2=2 |

| | | |
|---|---|---|
| | (iii) 'घोरम् आपतितम्' अनयोः पदयोः विशेषणपदं किम्? | |
| | | |
| 15. | रेखाङ्कित-पदानि आधृत्य प्रश्ननिर्माणं कुरुत - (केवलं पञ्चप्रश्नाः)<br>(i) **<u>अरुणाचलप्रदेशे</u>** पञ्चाशदधिकाः नद्यः प्रवहन्ति।<br>(ii) चपलबालकेभ्यः **<u>भीषणानाम्</u>** अस्त्राणां प्रदानं न उचितम्।<br>(iii) मनसः नियन्त्रणं **<u>वायोः</u>** इव सुदुष्करम् मन्यते।<br>(iv) मेषः दाहवेदनया **<u>भूमौ</u>** लुठति।<br>(v) शिष्यः एकचतुर्थांशं **<u>स्वमेधया</u>** आदत्ते।<br>(vi) राजहंसः **<u>वर्षर्तौ</u>** मानसं पलायते। | 1×5=5 |
| | | |
| 16. | मञ्जूषातः समुचितपदानि चित्वा अधोलिखित-श्लोकस्य अन्वयं पूरयित्वा पुनः लिखत –<br>**न तथा शीतलसलिलं न चन्दनरसो न शीतला छाया।**<br>**प्रह्लादयति च पुरुषं यथा मधुरभाषिणी वाणी॥**<br>अन्वयः- यथा मधुरभाषिणी (i) --------- पुरुषम् प्रह्लादयति (ii) --------- शीतलसलिलम् न चन्दनरसः न (iii) ---------- छाया च (iv) ---------- (प्रह्लादयति)।<br>मञ्जूषा<br>शीतला, वाणी, न, तथा।<br>अथवा<br>मञ्जूषायाः साहाय्येन श्लोकस्य भावार्थे रिक्तस्थानानि पूरयित्वा पुनः लिखत -<br>य इच्छत्यात्मनः श्रेयः प्रभूतानि सुखानि च।<br>न कुर्यादहितं कर्म स परेभ्यः कदापि च॥<br>भावार्थः- यदि कश्चित् (i) ----------- स्वस्य कल्याणं (ii) ---------------- जीवनम् च इच्छति तर्हि सः (iii) ------------ परेभ्यः अहितं कर्म न (iv) ---------------।<br>अर्थात् यथा व्यवहारं सः अन्यैः सह करिष्यति तथा एव अन्ये तेन सह व्यवहरिष्यन्ति।<br>मञ्जूषा<br>सुखमयम्, कुर्यात्, जनः, कदापि। | ½×4=2<br><br><br><br><br><br><br><br>½×4=2 |
| | | |
| 17. | अधोलिखितवाक्येषु रेखाङ्कितपदानां प्रसङ्गानुकूलम् उचितार्थं चित्वा लिखत-<br>(केवलं प्रश्नचतुष्टयम्)<br>(i) **<u>शैलानां</u>** पारं द्रष्टुं समर्थः भव।<br>(क) नदीनाम् (ख) वृक्षाणाम्<br>(ग) पर्वतानाम् (घ) मेघानाम्<br>(ii) भवता **<u>साधु</u>** उक्तम्।<br>(क) संन्यासी (ख) शुद्धम्<br>(ग) अनुचितम् (घ) सम्यक् | 1×4=4 |

| | | |
|---|---|---|
| | (iii) सर्वदा शारदा अस्माकं **<u>वदने</u>** सन्निधिं क्रियात्।<br>(क) गृहे (ख) वने<br>(ग) मुखे (घ) सर्वत्र<br>(iv) यूथपः **<u>रहसि</u>** अवदत्।<br>(क) रहस्यम् (ख) एकान्ते<br>(ग) उच्चैः (घ) मनसि<br>(v) स विवेकः इति **<u>ईरितः</u>**।<br>(क) कथितः (ख) श्रुतः<br>(ग) लिखितः (घ) दृष्टः | |
| | | |
| 18. | **मञ्जूषाप्रदत्तपदानां सहायतया रिक्तस्थानानि पूरयित्वा अधोलिखित-कथाम् उत्तरपुस्तिकायां लिखत –**<br>चन्द्रनामकस्य राजपुत्राः राजगृहे वानरान् पालयन्ति स्म। तस्मिन् राजगृहे (i) --------------- एकं मेषयूथम् अपि आसीत्। तेषु एकः उद्दण्डः मेषः अहर्निशं (ii) ---------------- प्रविश्य यत् पश्यति स्म तत् खादति स्म। अतः तेन सह सूपकाराणां कलहः भवति स्म। मेषस्य सूपकाराणां च कलहं दृष्ट्वा वानराणां बुद्धिमान् यूथपतिः तान् अवदत्- एतेषां कलहो वानराणां विनाशकारणं भविष्यति अतः (iii) ---------- राजभवनं त्यक्त्वा वनं गच्छाम। किन्तु (iv) ----------- वानराः तस्य वचनम् अश्रद्धेयं मत्वा वनं न अगच्छन्। एकदा सः उद्दण्डः (v) ------------ सूपकारैः ज्वलितकाष्ठेन ताडितः। ऊर्णाप्रचुरः मेषः जाज्वल्यमानशरीरः निकटस्थाम् अश्वशालां प्राविशत्। तेन अश्वशालायाम् अपि अग्निज्वालाः समुत्थिताः। अतः केचित् अश्वाः दग्धाः केचित् च (vi) ----------। राजवैद्यः नृपम् अवदत् यत् अश्वानां वह्निदाहसमुद्भवः दोषः (vii) ---------- मेदसा नाशमभ्येति। राजा आदिशत्- यथोचितं क्रियताम्। राजादेशं श्रुत्वा भयत्रस्ताः (viii) ----------- अचिन्तयन्- अवधीरिताः अस्माभिः गुरुजनोपदेशाः।<br>**मञ्जूषा**<br>मृताः, मेषः, वानराः, बालवाहनयोग्यम्, मदोद्धताः, वयम्, वानराणाम्, महानसम्। | ½×8=4 |
| | | |

-------------0000--------------

# आदर्शप्रश्नपत्रम् 2024-25
## कक्षा - दशमी
## संस्कृतम् (कोड संख्या - 119)

**समयः होरात्रयम्** **अङ्कयोजना उत्तरसङ्केताश्च** **पूर्णाङ्काः 80**

**अवधातव्यम् -**

1. अङ्कयोजनायां प्रदत्तानि उत्तराणि निदर्शात्मकानि सन्ति। प्रदत्तानि उत्तराणि अतिरिच्यापि सन्दर्भानुसारम् अन्यानि उत्तराणि भवितुम् अर्हन्ति।
2. **आन्तरिकविकल्पात्मकेषु प्रश्नेषु यद्यपि स्पष्टतया निर्देशः दत्तः अस्ति यत् केवलं प्रश्नद्वयम् अथवा प्रश्नत्रयम् इत्यादिकम् उत्तरं दातव्यं तथापि यदि छात्रः अतिरिक्त-प्रश्नानाम् उत्तराणि लिखति तर्हि छात्रहिताय निर्णयः कर्त्तव्यः।** यथा चित्रवर्णने पञ्चवाक्यानां लेखनम् अभीष्टं परं छात्रः यदि सप्तवाक्यानि लिखति तर्हि तत्र केवलं प्रथम-पञ्चवाक्यानां न अपितु यानि वाक्यानि उत्तमानि सन्ति तेषां मूल्याङ्कनं करणीयम्। **(अयं नियमः नवम्यां कक्षायाम् अपि पालनीयः।)**
3. गद्यांशे श्लोके नाट्यांशे वा पृष्टाः प्रश्नाः अवबोधात्मकाः सन्ति। अतः विद्यार्थिनः एतेषु प्रदत्तशब्दानां स्थाने समभाव-पर्यायवाचि-शब्दानां प्रयोगं कर्तुं शक्नुवन्ति। तदर्थम् अङ्काः देयाः। यदि विद्यार्थिनः उत्तरलेखन-समये समुचितानां विभक्तीनां वचनानां च प्रयोगं न कुर्वन्ति तर्हि अंशतः अङ्काः कर्तनीयाः न तु पूर्णाङ्काः।
4. त्रुटिपूर्णवर्तन्यै व्याकरणात्मक-प्रयोगाय च अनुपाततः अङ्काः कर्तनीयाः न तु सम्पूर्णाङ्काः।
5. आंशिक-दृष्ट्या समुचितेभ्यः उत्तरेभ्यः अपि अङ्काः देयाः।
6. रचनात्मक-कार्ये वाक्यरचना प्रमुखा न तु वाक्यसौन्दर्य-तत्त्वम्। अतः आंशिकवाक्यशुद्धये अपि अङ्काः देयाः।

| | **भागः 'क' अपठितावबोधनम्** | |
|---|---|---|
| 1 | **गद्यांशः**<br>**अ एकपदेन उत्तरत – (केवलं प्रश्नद्वयम्)**<br>(i) पर्यावरण-प्रदूषणम्<br>(ii) भूमेः<br>(iii) वृक्षाः | 1×2=2 |
| | **आ पूर्णवाक्येन लिखत - (केवलं प्रश्नद्वयम्)**<br>(i) पर्यावरणस्य आधाराः पुष्पिताः, पल्लविताः वृक्षाः भवन्ति।<br>(ii) वृक्षाः पुष्पाणां फलानाम्, औषधीनां च आगाराः सन्ति।<br>(iii) वृक्षाणाम् जलं मेघानां निर्माणे सहायकं भवति इत्थं वृक्षाः वर्षायै सहायकाः भवन्ति। | 2×2=4 |

| | | |
|---|---|---|
| | **इ अस्य अनुच्छेदस्य कृते उपयुक्तं शीर्षकं संस्कृतेन लिखत –**<br>पर्यावरणम् / वृक्षाः /वृक्षाणां महत्त्वम्/ प्रकृतिसंरक्षणम्/वृक्षाः सत्पुरुषा इव<br>छात्रस्य उत्तरं दृष्ट्वा छात्रहिताय समुचितः निर्णयः करणीयः।<br>**ई यथानिर्देशम् उत्तरत (केवलं प्रश्नत्रयम्)**<br>(i) (ग) समस्या<br>(ii) (घ) पश्यामः<br>(iii) (ख) स्वच्छम्<br>(iv) (क) वृक्षाः | 1<br><br>1×3=3 |
| | **भागः 'ख' रचनात्मकं कार्यम्** | |
| 2. | **पत्रलेखनम्**<br>**भवतः नाम तनिष्कः। भवतः विद्यालये संस्कृतनाटकस्य मञ्चनम् अभवत् । तदर्थं मित्रं दीपकम् प्रति लिखितं पत्रं मञ्जूषातः पदानां सहायतया पूरयित्वा उत्तरपुस्तिकायां लिखत -**<br>आदर्शविद्यालयः,<br>**(i) दिल्लीतः**<br>दिनाङ्कः ---------------<br>प्रियमित्र **(ii) दीपक!**<br>**(iii) सस्नेहं नमः** ।<br>अत्र सर्वगतं कुशलम्। आशासे त्वम् अपि कुशली। यथा त्वम् जानासि गत सप्ताहे मम विद्यालये संस्कृत-उत्सवः सम्पन्नः। अस्मिन् उत्सवे संस्कृतपरिषदः **(iv) छात्राः** पाठ्यपुस्तकस्य 'कवयामि वयामि यामि' इति नाटकस्य **(v) मञ्चनम्** अकुर्वन्। तस्मिन् नाटके मया 'भोजस्य' अभिनयः कृतः । कुविन्दस्य अभिनयं मम मित्रं प्राञ्जलः अकरोत्। तस्य मुखात् श्लोकगायनं **(vi) श्रुत्वा** सर्वेऽपि उपस्थिताः दर्शकाः भावविभोराः जाताः करतलध्वनिभिः च तस्य उत्साहवर्धनम् **(vii) कृतवन्तः**। कार्यक्रमस्य अन्तेऽपि मुख्यातिथिमहोदयेन संस्कृतनाटकस्य भूरि भूरि **(viii) प्रशंसा** कृता। वस्तुतः अयम् उत्सवः मनोरञ्जकं ज्ञानवर्धकं च आसीत्।<br>तव विद्यालये संस्कृतोत्सवः कदा भविष्यति इति अवश्यं सूचय। मातृपितृचरणेषु **(ix) मम** प्रणामाः ।<br>तव मित्रम्<br>**(x) तनिष्कः** | ½×10=5 |
| | | |

| | | |
|---|---|---|
| 3. | **चित्रवर्णनम्**<br>अत्र छात्रेभ्यः संक्षिप्तवाक्यरचना अपेक्षिता वर्तते। केवलं वाक्यशुद्धिः द्रष्टव्या। **अस्य प्रश्नस्य प्रमुखम् उद्देश्यं वाक्यरचना अस्ति।** वाक्यं दीर्घम् अस्ति अथवा लघु इति महत्त्वपूर्णं नास्ति। प्रतिवाक्यम् अर्धः अङ्कः भावस्य कृते अर्धः अङ्कः च व्याकरणदृष्ट्या शुद्धतानिमित्तं निर्धारितः अस्ति। मञ्जूषायां प्रदत्ताः शब्दाः सहायतार्थं सन्ति। छात्रः तेषां वाक्येषु प्रयोगं कुर्यादेव इति अनिवार्यं नास्ति। छात्रः स्वमेधया अपि वाक्यानि निर्मातुं शक्नोति। मञ्जूषायां प्रदत्तानां शब्दानां विभक्तिं परिवर्तनं कृत्वा अपि वाक्यनिर्माणं कर्तुं शक्यते।<br><br>**अथवा**<br>**अनुच्छेदलेखनम्**<br>अयं विकल्पः सर्वेभ्यः अस्ति। छात्राः मञ्जूषायां प्रदत्तानां शब्दानां विभक्तिं परिवर्तनं कृत्वा अपि वाक्यनिर्माणं कर्तुं शक्नुवन्ति। अतः अङ्काः देयाः। अस्य मूल्याङ्कनाय अन्ये नियमाः चित्रवर्णनस्य अनुगुणं पालनीयाः। | 1×5=5<br><br><br><br><br><br><br>1×5=5 |
| | | |
| 4. | **संवादपूर्तिः**<br>**पुत्रः** - तात! प्रणमामि।<br>**पिता – (i) चिरञ्जीव ! वद सर्वं कुशलम् ?**<br>**पुत्रः** - आम् तात! सर्वं कुशलम् अस्ति।<br>**पिता** - उत्तमम्। विद्यालये तव अध्ययनं कथं प्रचलति, कापि समस्या तु नास्ति ?<br>**पुत्रः** - न, कापि समस्या नास्ति परन्तु एकत्र भवताम् अनुमतिं सहाय्यं च इच्छामि।<br>**पिता** - कस्मिन् सन्दर्भे , निस्सङ्कोचं वद।<br>**पुत्रः** – श्वः मम प्रियशिक्षकस्य जन्मोत्सवः भविष्यति। अहम् **(ii) तत्र भवता सह गन्तुम् इच्छामि।**<br>**पिता** - शिक्षक तु सदैव पूज्यः। तस्मिन् सन्दर्भे सङ्कोचः न कर्तव्यः। **(iii) शिक्षकं पृच्छ, कदा कार्यक्रमः भविष्यति?**<br>**पुत्रः** - अहं पूर्वमेव पृष्टवान्, कार्यक्रमः सायं सप्तवादने भविष्यति। केवलं भवतां समयस्य आशङ्का आसीत्।<br>**पिता** - चतुर! सर्वं निश्चित्य मां पृच्छसि। **(iv) अस्तु, अहं कार्यालयात् समयेन आगमिष्यामि।**<br>**पुत्रः** - तात! किमपि उपायनं स्वीकरणीयम् अस्ति।<br>**पिता** - अस्तु! मात्रा सह आपणं गत्वा उत्तमम् उपायनं स्वीकुरु।<br>**पुत्रः** - **(v) अस्तु, धन्यवादः।**<br>**अथवा** | 1×5=5 |

| | | |
|---|---|---|
| | **कथापूर्तिः**<br>एकदा एका चटका आसीत्। सा वनस्य एकस्मिन् उन्नतवृक्षे **(i) स्वनीडे** वसति स्म । एकदा वने **(ii) महती** वृष्टिः अभवत्। तदा पीडितः एकः वानरः **(iii) आश्रयार्थम्** तत्वृक्षस्य अधः आगच्छत् । वानरं दृष्ट्वा **(iv) चटका** अवदत् - "भोः वानर! भवान् किमर्थं व्यर्थमेव दुःखी भवति ? **(v) भवतः** शरीरं मनुष्य-शरीरम् **(vi) इव** अस्ति । हस्तौ पादौ च सम्यक् सन्ति । भवान् उत्तम-गृहस्य **(vii) निर्माणम्** किमर्थं न करोति ?" तत् श्रुत्वा वानरः कुपितः अभवत्। वानरः **(viii) कोपेन** चटकाम् अवदत्- "किमर्थं भवती तूष्णीं न **(ix) तिष्ठति** ? किमर्थं मम उपहासं करोति ?" इति उक्त्वा सः वानरः **(x) वृक्षम्** आरोहत् चटकायाः च नीडम् अनाशयत्। अतः कथ्यते- मूर्खेभ्यः सदुपदेशाः न हिताय। | **½×10=5** |
| | | |
| | **भागः 'ग' अनुप्रयुक्तव्याकरणम्** | |
| **5** | **सन्धिः सन्धिच्छेदश्च (केवलं प्रश्नचतुष्टयम्)**<br>(i) प्रयुक्तोऽयम्<br>(ii) न + एतत्<br>(iii) कः + चिद्<br>(iv) पापिनां + च<br>(v) संस्कृतच्छात्राः | **1×4=4** |
| | | |
| **6** | **समस्तपदं विग्रहः च (केवलं प्रश्नचतुष्टयम्)**<br>(i) (ख) सर्वं ददाति इति<br>(ii) (ग) युधिष्ठिरः च अर्जुनः च<br>(iii) (घ) पर्यटनस्थलानि<br>(iv) (क) यथास्थानम्<br>(v) (ग) पिककाकयोः | **1×4=4** |
| | | |
| **7.** | **प्रत्ययाः (केवलं प्रश्नचतुष्टयम्)**<br>(i) (ख) इतिहास+ठक्<br>(ii) (घ) रमणीया<br>(iii) (क) पञ्च + त्व<br>(iv) (ग) चक्षुष्मन्तः<br>(v) (क) सरलता | **1×4=4** |
| | | |

| | | |
|---|---|---|
| 8 | **वाच्यम् (केवलं प्रश्नत्रयम्)**<br>(i) त्वया<br>(ii) क्रियते<br>(iii) प्रार्थनाम्<br>(iv) अहम् | 1×3=3 |
| | | |
| 9 | **समयः (केवलं प्रश्नत्रयम्)**<br>(i) सार्ध-सप्तवादने<br>(ii) सपाद-द्वादशवादने<br>(iii) एक -वादने<br>(iv) पादोन-त्रिवादने | 1×3=3 |
| | | |
| 10 | **अव्ययपदानि (केवलं प्रश्नचतुष्टयम्)**<br>(i) सहसा<br>(ii) इदानीम्<br>(iii) नूनम्<br>(iv) तथा<br>(v) तु | 1×4=4 |
| | | |
| 11 | **अशुद्धसंशोधनम् (केवलं प्रश्नत्रयम्)**<br>(i) (ग) अवदन्<br>(ii) (ख) कीदृशी<br>(iii) (ग) भवान्<br>(iv) (क) करिष्यसि | 1×3=3 |
| | | |
| | **भागः 'घ' पठितावबोधनम्** | |
| 12. | **गद्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत –**<br>**अ. एकपदेन उत्तरत। (केवलं प्रश्नद्वयम्)**<br>(i) धनलाभमात्रेण<br>(ii) चक्षुर्दानम्<br>(iii) लोकयात्रा | 5<br>½×2=1 |

| | | |
|---|---|---|
| | **आ. पूर्णवाक्येन उत्तरत। (केवलं प्रश्नद्वयम्)**<br>(i) शक्रः नेत्रहीनयाचकस्य रूपं धारयित्वा राज्ञः पुरतः अवदत्- हे राजन्! भवतः दानवीरताम् आकर्ण्य आशान्वितः भवत्समीपम् आगतोऽस्मि। देव! रवि-शशि-तारा-मण्डलभूषितं जगत् एतत् कथमिव पश्येयं चक्षुर्हीनः !<br>(ii) शक्रः राज्ञः दानशीलतां परीक्षितुम् आगतः।<br>(iii) विप्रः स्वलोकयात्रां निर्बाधं कर्तुं चक्षुषः दानम् इच्छति स्म।<br>अथवा<br>विप्रः रवि-शशि-तारा-मण्डलभूषितं जगत् द्रष्टुं चक्षुषः दानम् इच्छति स्म।<br>**इ. निर्देशानुसारम् उत्तरत। (केवलं प्रश्नद्वयम्)**<br>(i) आकर्ण्य<br>(ii) भजन्ते<br>(iii) दानम् | **1×2=2**<br><br>**1×2=2** |
| | | |
| **13.** | **पद्ये पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत –**<br>**अ. एकपदेन उत्तरत - (केवलं प्रश्नद्वयम्)**<br>(i) कुकर्मान्तम्<br>(ii) सौहृदम्<br>(iii) हर्म्याणि<br>**आ. पूर्णवाक्येन उत्तरत - (केवलं प्रश्नद्वयम्)**<br>(i) मनः चलं दुर्निग्रहं च अस्ति।<br>(ii) मनः अभ्यासेन वैराग्येण च गृह्यते।<br>(iii) कुराजान्तानि राष्ट्राणि भवन्ति।<br>**इ. निर्देशानुसारम् उत्तरत। (केवलं प्रश्नद्वयम्)**<br>(i) सौहृदम्<br>(ii) मनः<br>(iii) गृह्यते | **5**<br>**½×2=1**<br><br>**1×2=2**<br><br>**1×2=2** |
| | | |
| **14.** | **अधोलिखितं नाट्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत -**<br>**अ. एकपदेन उत्तरत। (केवलं प्रश्नद्वयम्)**<br>(i) द्रौपदी<br>(ii) वारणावते<br>(iii) रणभूमौ<br>**आ. पूर्णवाक्येन उत्तरत। (केवलं प्रश्नद्वयम्)**<br>(i) द्रौपदी दीर्घं निःश्वस्य कथयति- हा हन्त। किम् इदं घोरम् आपतितम्, पापकर्मणा | **5**<br>**½×2=1**<br><br>**1×2=2** |

| | | |
|---|---|---|
| | द्रौणिना मे पुत्राः भ्रातरः च हताः। अग्निः इव दहति माम् अयं शोकः।<br>(ii) भीमः वारणावते पाण्डवान् रक्षितवान् ।<br>(iii) भीमः द्रौणिम् अनुगन्तुम् अनुमतिम् इच्छति ।<br>**इ. निर्देशानुसारम् उत्तरत। (केवलं प्रश्नद्वयम्)**<br>(i) प्रविशति<br>(ii) श्रीकृष्णः<br>(iii) घोरम् | **1×2=2** |
| | | |
| **15.** | **प्रश्ननिर्माणं कुरुत - (केवलं पञ्चप्रश्नाः)**<br>(i) **कुत्र** पञ्चाशदधिकाः नद्यः प्रवहन्ति ?<br>(ii) चपलबालकेभ्यः **कीदृशाणानाम्** अस्त्राणां प्रदानं न उचितम् ?<br>(iii) मनसः नियन्त्रणं कस्य इव सुदुष्करम् मन्यते ?<br>(iv) मेषः दाहवेदनया **कुत्र/कस्यां** लुठति ?<br>(v) शिष्यः एकचतुर्थांशं **कया** आदत्ते ?<br>(vi) राजहंसः **कदा** मानसं पलायते ? | **1×5=5** |
| | | |
| **16.** | **अन्वयपूर्तिः**<br>**अन्वयः**- यथा मधुरभाषिणी **(i) वाणी** पुरुषम् प्रह्लादयति **(ii) तथा** शीतलसलिलम् न चन्दनरसः न **(iii) शीतला** छाया च **(iv) न** (प्रह्लादयति)।<br>**अथवा**<br>**भावार्थे रिक्तस्थानपूर्तिः**<br>यदि कश्चित् **(i) जनः** स्वस्य कल्याणं **(ii) सुखमयम्** जीवनम् च इच्छति तर्हि सः **(iii) कदापि** परेभ्यः अहितं कर्म न **(iv) कुर्यात्** । अर्थात् यथा व्यवहारं सः अन्यैः सह करिष्यति तथा एव अन्ये तेन सह व्यवहरिष्यन्ति। | **½×4=2**<br><br><br><br>**½×4=2** |
| | | |
| **17.** | **प्रसङ्गानुकूलम् उचितार्थम् (केवलं प्रश्नचतुष्टयम्)**<br>(i) (ग) पर्वतानाम्<br>(ii) (घ) सम्यक्<br>(iii) (ग) मुखे<br>(iv) (ख) एकान्ते<br>(v) (क) कथितः | **1×4=4** |
| | | |

| | | |
|---|---|---|
| 18. | **पठितकथा-पूर्तिः–**<br>चन्द्रनामकस्य राजपुत्राः राजगृहे वानरान् पालयन्ति स्म। तस्मिन् राजगृहे **(i) बालवाहन-योग्यम्** एकं मेषयूथम् अपि आसीत्। तेषु एकः उद्दण्डः मेषः अहर्निशं **(ii) महानसम्** प्रविश्य यत् पश्यति स्म तत् खादति स्म। अतः तेन सह सूपकाराणां कलहः भवति स्म। मेषस्य सूपकाराणां च कलहं दृष्ट्वा वानराणां बुद्धिमान् यूथपतिः तान् अवदत्- एतेषां कलहो वानराणां विनाशकारणं भविष्यति अतः **(iii) वयम्** राजभवनं त्यक्त्वा वनं गच्छाम। किन्तु **(iv) मदोद्धताः** वानराः तस्य वचनम् अश्रद्धेयं मत्वा वनं न अगच्छन्। एकदा सः उद्दण्डः **(v) मेषः** सूपकारैः ज्वलितकाष्ठेन ताडितः। ऊर्णाप्रचुरः मेषः जाज्वल्यमानशरीरः निकटस्थाम् अश्वशालां प्राविशत्। तेन अश्वशालायाम् अपि अग्निज्वालाः समुत्थिताः। अतः केचित् अश्वाः दग्धाः केचित् च **(vi) मृताः** । राजवैद्यः नृपम् अवदत् यत् अश्वानां वह्निदाहसमुद्भवः दोषः **(vii) वानराणाम्** मेदसा नाशमभ्येति। राजा आदिशत्- यथोचितं क्रियताम्। राजादेशं श्रुत्वा भयत्रस्ताः **(viii) वानराः** अचिन्तयन्- अवधीरिताः अस्माभिः गुरुजनोपदेशाः। | ½×8=4 |

-------------0000--------------